पर्याप्ता मधुरा सान्द्रा सुवर्णा सुनिरन्तरा।
मधुधा मधुधारेव रसिकै रस्यतामलम् ।।

# मधुधा

## (षाण्मासिकी वैद्युती संस्कृतपत्रिका)

संस्कृतविभागो
दिल्लीविश्वविद्यालयस्य

# मधुधा

## (षाण्मासिकी वैद्युती संस्कृतपत्रिका)

### ॥प्रवेशाङ्कः॥

### २०१४

(उत्तरार्द्धम्)


प्रधानसम्पादकः– आचार्यो रमेशचन्द्रभारद्वाजः

सम्पादकः – डॉ॰ भारतेन्दुपाण्डेयः

सहसम्पादकः–डॉ॰ बलरामशुक्लः

छात्रसम्पादकः–प्रशान्तः

सहच्छात्रसम्पादकः–मोहितकुमारः



प्रकाशकः– आचार्यो रमेशचन्द्रभारद्वाजः अध्यक्षः संस्कृतविभागस्य दिल्ली

विश्वविद्यालयस्थस्य ।

# अनुक्रमणी


| विषयाः | लेखकाः | पृष्ठसङ्ख्या |
|---|---|---|
| सम्पादकीयम् | | १ |
| १– स्वप्नफलकम् | ऋचा | ३ |
| २–न खलु परिवर्तितोऽहम् | द्विवेदिगवीशः | ५ |
| ३–धृतविग्रह एव शिवोऽसि सखे ! | युवराजभट्टराई | ७ |
| ४–बन्धो ! कथं सुदिवसेति समागतस्ते ? | मोहितकुमारः | ११ |
| ५–मीमांसासम्मतो धर्मः | प्रशान्तः | १४ |
| ६–भारतीया संस्कृतिः | भारतकुमारः | १९ |
| ७–उत्कृष्टविनोदः | सन्दीपकुमारः | २१ |
| ८–आधुनिका राजमहिष्यः | सन्दीपकुमारः | २७ |
| ९–गतं क्व देशभारतम् | दयालसिंहपवारः | २९ |

| | | |
|---|---|---|
| १०–**प्रेमसत्रम्** | बलरामशुक्लः | ३२ |
| ११–**संस्कृतगीतम्** | वेदप्रकाशडिंडोरिया | ३५ |
| १२–**गुर्वष्टकम्** | रञ्जनकुमारत्रिपाठी | ३७ |
| १३–**आचार्यपुरुषोत्तमस्तवः** | ओमनाथबिमली | ४० |
| १४– **रे यक्ष!** | भारतेन्दुपाण्डेयः | ४२ |
| १५– **आधुनिकवैद्युतशोधोपकरणानि** | बलरामशुक्लः | ४४ |

# सम्पादकीयम्

संस्कृतमालक्ष्य धारणेयमेव लोकेऽतिबलवत्तया बद्धमूलेवावलोक्यते यद् भाषामिमामधीयाना जनाः सर्वात्मना पुरातनताग्रहिणो भवन्ति तथा विकासमभिनवमवगन्तु–मुपयोक्तुं वा न तेऽभिलषन्ति। दौर्भाग्याद् धारणा एतादृशी विचारैराचारैश्च स्वकैः सम्भवतः संस्कृतलोक एव साधारणलोकमतावुत्पादयत्युद्दीपयति च। परम्, अत्र विश्वस्य बृहत्तमेन संस्कृतविभागेनात्रत्येन भिन्नैव सृतिरनुसृता काचित् ! विभागोऽयं परम्परागतनिजविद्याविग्रहपादपद्मसपर्यामहर्निशं यदि सम्पादयतितदाऽसौ वैज्ञानिकेन नवनवोन्मेषेणापि सह प्रतिपदं संवादमाधातुं प्रयतते। अस्यैतदेतादृशञ्चान्तर्जालस्थान–मेषा पत्रिका च वैद्युती विशिष्टवर्त्मानुवर्तनस्यैव पूर्वोक्तस्य परिणामोऽस्ति प्रत्यग्रतमः कश्चित्।

एषा पत्रिका तु वस्तुतः केवलं पत्रिकात्वेनैव न ग्राह्या । सेयमपि एकामन्यामेव दृष्टिमादाय प्रवर्त्यते। अध्यापकानां छात्राणाञ्चानुसन्धानवृत्तिः शोधपत्र–प्रबन्धाद्यात्मना यदा प्रतिफलति, तदाऽसौ नियमनिर्धारितां निजपद्धतिमनुसरन्ती प्रायः कृतकृत्या भवति। परम्, प्रतिभा कारयित्री यदैतदीया कदाचित् किञ्चित् पुण्यं पुष्पं फलं वा सूते, न तत् तावत् नियतं पदमीक्षते स्वकृते सामान्ये जगति शैक्षणिके। अतः कारणात् तेषु

निसर्गतो निषीदन्त्यपि प्रतिभा पल्लवनाकाशमलभमाना तत्रैव जीर्यति।

तादृशमेवाकाशं तेभ्यः सुलभीकर्तुमयं पत्रिकात्मकः प्रकल्पोऽस्ति। निजाजिर एव एतादृशमाकाशमवाप्य शोधादितरस्मिन्नपि क्षेत्रे सर्वेषामेव तेषां लेखनकौशलमत्यन्तमुच्चैरुद्योतिष्यत इत्याशास्यते।

मधुधेति ऋग्वेदे भगवत्या उषसो विशेषणत्वेन व्यपदेशविशेषत्वेन वा राराज्यतेतमाम्। प्रभातगर्भा उषा इवेयमपि सर्वमङ्गल्या भविष्यतीत्यनेन विश्वासेनायं प्रवेशाङ्कः पत्रिकाया भवद्भ्यः सप्रश्रयं समर्प्यते।

**॥ इति ॥**

# स्वप्नफलकम्

–ऋचा

स्नातकोत्तरोत्तरार्द्धीया छात्रा

प्रशान्तप्रकोष्ठे स्थितं शोकार्तं फलकम्

कदाचिन्नमन्त्रयति कदाचिन्नोदयति

कदाचिल्लासयति कदाचिद् प्रार्थयति।

वारं वारं अवरुणद्धि माम्

अहं तदपवार्य यामि

तद्द्रुतपदेनागच्छति मत्समक्षम्।

अहं स्थित्वा

चिन्तयामि

आत्मानं धारयामि

रागान्विते संसारे

स्वीयस्वप्नान् तोलयामि

तदा सङ्कल्पतूलिकया

स्वीयपक्षानङ्कयामि

स्वीयोड्डयनं लिखामि।।

# न खलु परिवर्तितोऽहम्

**–द्विवेदिगवीशः**

**स्नातकोत्तरोत्तरार्द्धीयः छात्रः**

नवर्तुरिव समुद्भूतोऽहम्

न खलु परिवर्तितोऽहम्

लोका आलपन्ति वर्णान् परिवर्तयाम्यहम्

केवलं परिस्थित्यनुसारेण परिष्करोम्यहम्

जगति सर्वं नूतनमीक्षेऽहम्

अत्रात्मानं ग्लेषेऽहम्

मनसा दिवः परान्तं समुड्डयेऽहम्

न वै कन्दुकमिव तटाम्यहम्

वदन्तु नाम ये कथयन्ति धूर्तोऽहम्

नैवात्मानं परांश्च छूर्छाम्यहम्

नवीनाकारेण समुद्भूतोऽहम्

## न खलु परिवर्तितोऽहम्

कथयन्ति ये मूर्खास्ते

परसाफल्यमसहमाना इमे

मत्सार्धम् स्पर्धितुमिच्छन्तो

न प्राप्स्यन्ति किमप्येते ।।

# धृतविग्रह एव शिवोऽसि सखे!

–युवराजभट्टराई
शोधच्छात्रः

मम कारणतो विपदोऽगणिताः
त्वयि साधुजनेऽत्र समापतिताः।
प्रिय! मित्र! तथाऽपि मुदा सहसे
धृतविग्रह एव शिवोऽसि सखे!॥

सुविलम्बवशाद् बहुधाऽऽतुरिते
विविधासु क्रियासु मया स्खलिते।
न कदाऽपि च खेदमहो कुरुषे
धृतविग्रह एव शिवोऽसि सखे!॥

बहुशो जनवादगते विषये
विवदन्ति जनाः यदि मे चरिते ।
विनिगूहसि दोषगणं मम रे!

धृतविग्रह एव शिवोऽसि सखे!॥

प्रतिकूलगते कठिने समये
विजहासि न मामुररीकुरुषे।
तव सज्जनतां निगदामि सखे!
धृतविग्रह एव शिवोऽसि सखे!॥

बहुविघ्नमये विकटे समये
मनसा वचसा क्रिययाऽपि च मे ।
सततं हि सदाशयतां तनुषे
धृतविग्रह एव शिवोऽसि सखे!॥

मम चाभ्युदयाय सदा यतसे
विहिते स्खलने प्रतिबोधयसे।
कुपथाच्च सदैव निवारयसे
धृतविग्रह एव शिवोऽसि सखे!॥

अवसादविषादगतेऽवसरे
सुविनोदमिषेण च रञ्जयसे ।
अथ हासयितुं विवशीकुरुषे
धृतविग्रह एव शिवोऽसि सखे!॥

विपरीतधिया गतवाक्कलहे–
ऽनुचितं न कृतं प्रतिशोधकृते।
परिपीडयितुन्त्वपि नो यतसे
धृतविग्रह एव शिवोऽसि सखे!॥

सुखमानकृते गतिशीलयुगे
इह कोऽन्यजनोन्नतये यतते? ।
अभवस्सुसहायकता मम रे!
धृतविग्रह एव शिवोऽसि सखे!॥

सहजेऽसहजे समयेऽसमये
क्वचनापि तथा गमनागमने।
शुभमेव सदा मम कामयसे
सुखदो नवजीवनदोऽसि सखे! ॥

वचनेन च मोदततिं तनुषे
हठधर्मितया विकलीकुरुषे ।
गुणगौरवतोऽपि कृतार्थयसे
किमु वच्मि नु ते विषयेऽयि सखे !॥

हितकामनया मम लाभकृते
स्वसुखं परिहाय सदा त्वरसे।
तुलना तव केन कथं वद रे !
किमु वच्मि नु ते विषयेऽयि सखे !॥

किमु वच्मि कथाश्च तवोपकृतेः
प्रतिदातुमहं प्रभवामि न ते ।
ऋणमेव दधे सततं हृदये
धृतविग्रह एव शिवोऽसि सखे!॥

सुमुखीं गणयामि न सख्यकृते
सुरलोकसुखं तव पादतले।
भुवि सख्यसमं नहि किञ्चन रे
धृतविग्रह एव शिवोऽसि सखे!॥

# बन्धो! कथं सुदिवसेति समागतस्ते ?

–मोहितकुमारः
शोधच्छात्रः

विद्यालयेषु तव संस्कृतनाममात्रम्,
यत्रापि शिष्टमिति तत्सुविकल्परूपम्।
तत्रापि पाठनपरा बिबुधा न सन्ति,
बन्धो ! कथं सुदिवसेति समागतस्ते?॥

वैदेशिकैस्सुपठिता बहुमन्यमाना,
किन्तु स्वदेशविषये च तिरस्कृतेयम्।
नाधीयते तु बहुभिः न च पाठ्यते वा,
बन्धो ! कथं सुदिवसेति समागतस्ते?॥

देशे तु पाण्डुलिपयो बहुधा हि सन्ति,
किन्तु त्वदीयकरयोर्नन्नु नोपलब्धाः।
एता विदेशविदुषे च सदा सुलब्धाः,
बन्धो ! कथं सुदिवसेति समागतस्ते?॥
गीतं हि संस्कृतगिरा न सुगीयतेऽत्र,

तत्डिंगडिंगसदृशैर्बहुभिस्सुगीतम्।
गानं त्वदीयमतुलं बहुधा विलुप्तम्,
बन्धो ! कथं सुदिवसेति समागतस्ते?॥

सर्वैर्यद्यपि काम्यते सुदिवसः तस्मै प्रयासो नहि,
केचिद् सन्ति सुमार्गगाः हि विरलाः किञ्चित् प्रयासे रताः।
अस्माभिर्यदि शक्यते तु सततं कार्यः प्रयत्नो महान्,
तेनैतद्दिवसस्य लब्धिरधुनैतत्कामये मोहितः॥

# मीमांसासम्मतो धर्मः

**–प्रशान्तः**[1]

**शोधच्छात्रः**

अतिशेतेतरामितराणि शास्त्राणि मीमासाशास्त्रंधर्मस्वरूपनिरूपणे।द्वादशलक्षण्यामस्यां विस्तरेण विविच्य धर्मस्वरूपं वेदप्रतिपादितं निरणैषीज्जैमिनिः। एतादृशमेव धर्ममाश्रित्यात्र यथामति विचारयामः किञ्चित्।

धर्मो नाम भारतीयेऽस्मिन् समाजे जनानां महद्रुचिविषयो वर्तत इति तु स्पष्टमेव विचारचतुराणाम्। विशेषतश्च संस्कृताभिज्ञानाम्। प्रायेण सर्वेप्यात्मानं धार्मिकं मन्यन्ते लोके। अत एव शास्त्रकृद्भिरपि स्वस्वमतमनुसृत्य धर्मविवेचनं व्यधायि।

इत्थञ्चात्र विषये समदर्शिषुः मीमांसाभाष्यकाराः शबरस्वामिनः **"धर्मं प्रति हि विप्रतिपन्नाः बहुविदः, केचिदन्यं धर्ममाहुः केचिदन्यम्। सोऽयमविचार्य प्रवर्तमानः**

[1]जनवरीमासे पुण्यपत्तने वाक्यार्थसभयायोजितायां शास्त्रार्थस्पर्धायां व्याकरणवर्गे प्राथम्यं भजमानाय लेखकायास्मै गणपतेः सौवर्णीप्रतिमोपायनीकृता।

**कश्चिदेवोपाददानो विहन्येत, अनर्थं च ऋच्छेत्। तस्माद्धर्मो जिज्ञासितव्य इति"   (मीमांसासूत्रम्  १/१/१)॥**

तत्र धर्मविषयकविप्रतिपत्तयः इत्थं वर्णनीयाः।

यागाद्यनुष्ठानाज्जायमानः अन्तःकरणवृत्तिविशेषो धर्म इति सांख्याः।

ज्ञानसम्बन्धिज्ञानजन्या वासना इति बौद्धाः ।

शरीरोत्पत्तिहेतवः पुद्गलाख्या परमाणवो धर्म इति जैनाः।

विधिप्रत्ययवाच्यः अपूर्वो धर्म इति मीमांसकैकदेशिनः प्राभाकराः।

आत्मविशेषगुणो धर्म इति तार्किकाः।

एतदतिरिच्यापि आचारः परमो धर्मः , अहिंसा परमो धर्मः , अयञ्च परमो धर्मः यद्योगेनात्मदर्शनम् इत्यादिकं बहुधा विद्वद्भिरवादि स्वस्वशास्त्रपन्थानमनुरुन्धानैः। मतभेदोऽयं श्लोकवार्तिके सम्यक् निराकृतः कुमारिलभट्टेन। (चोदनासूत्रे श्लोकवार्तिकम् १९५–९६)

तत्र मीमांसका वेदस्यैव परमप्रामाण्यमुररीकुर्वन्तीति नास्ति तिरोहितमभियुक्तानाम् । मीमांसकमते मन्त्रब्राह्मणयोर्वेदनामधेयमिति प्रसिद्धत्वात् संहितामन्त्रैस्तद्व्याख्यानभूतैर्ब्राह्मणवाक्यैश्च बोधितो योऽर्थः प्रयोजनवान् स एव धर्म इति व्यपदिश्यते।

**"धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्"** इति जिज्ञासासूत्रे श्लोकवार्तिके उक्तत्वात् द्वादशाध्यायात्मकं मीमांसाशास्त्रं धर्मस्वरूपपरिज्ञानायैव न्यभान्त्सीत् सूत्रकारो जैमिनिः। मीमांसासूत्रे धर्मलक्षणं विदधता **'चोदनालक्षणोऽर्थो धर्म'** इति सूत्रकारेणैवाभाणि। सूत्रेऽस्मिन् चोदनापदेन विधि–मन्त्र–नामधेय–निषेध–अर्थवादरूपः पञ्चविधः वेदः स्वीकर्त्तव्यः । अर्थसंग्रहादिग्रन्थेषु चोदनापदस्य वेदमात्रपरत्वादित्यादीनां वाक्यानामत्रप्रमाणत्वात् । तथा च **वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः** इति धर्मस्य लक्षणं पर्यवसन्नं भवति मीमांसकसम्मतम् । एवं च धर्मः साधनीयश्चेत् तस्य साधनं वेदोऽस्तीत्यायाति। एवं स्वीक्रियमाणे–

**धर्मे प्रमीयमाणे हि वेदेन करणात्मना।**
**इतिकर्तव्यताभागं मीमांसा पूरयिष्यति॥**

इति भट्टकुमारिलस्य कथनं स्पष्टं संगच्छते। एतदनुसारं धर्मस्य इतिकर्त्तव्यता नाम कर्त्तव्यतायाः प्रकार एव **अथातो धर्मजिज्ञासा (१/१/१)** इत्यत आरभ्य **अन्वाहार्ये च दर्शनात् (१२/४/४७)** इति यावत् युक्तियुक्तं प्रत्यपादयद् ग्रन्थकारः समग्रमीमांसादर्शने।

एतावता धर्मस्य लक्षणं किमिति निरूपितमिदानीं तदुदाहरणं किमिति प्रश्ने **'यागादिरेव धर्म'** इत्येवोत्तरं प्रदेयम्। तथा च दृश्यतां शबरस्वामिनो मनोहरा प्रसन्नपदा वाक्यवल्लरी **"य एव श्रेयस्करः स एव धर्मशब्देनोच्यते। कथमवगम्यताम् ?यो हि यागमनुतिष्ठति तं धार्मिक इति समाचक्षते। यश्च यस्य कर्त्ता स तेन व्यपदिश्यते। यथा पाचको लावक इति। तेन यः पुरुषं निःश्रेयसेन संयुनक्ति स धर्मशब्देनोच्यते। न केवलं लोके, वेदेऽपि 'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्' (१०/९०/१६) इति यजतिशब्दवाच्यमेव धर्मं समामनन्ति। " (मीमांसासूत्रम् १/१/२)**

अत्र यजधातोर्यो वाच्यार्थो यागः स एव धर्म इति न्यगादीद् भाष्यकारः । अतः का गौः इति प्रश्ने गोत्वसामान्ययुक्तस्य सास्नादिमतः प्राणिविशेषस्य कर्णादिकं

गृहीत्वा यथा बोध्यते इयं गौः इति तद्वत् अत्रापि को धर्म इत्युक्ते यागादिरेव इत्येव वक्तव्यम् । उक्तरीत्या मीमांसकानां धर्मः वेदमूलकः।

तस्य लक्षणं **चोदनालक्षणोऽर्थो धर्मः** अथवा **वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्मः** इति।

**यागादिरेव धर्म** इति तु धर्मस्योदाहरणमस्तीति विषयविभागः स्वीकार्यः । अन्यथाकरणे तु साङ्कर्यवशादत्र बहवोऽपि सन्दिहाना एव दृश्यन्ते।

# भारतीया संस्कृतिः

**भारतकुमारः**
**शोधच्छात्रः**

संस्कृतिर्भारतीया जगन्मोहिनी ।
विश्वसञ्चारिणी चिन्मनोहारिणी ॥
भारते भातु सा भारतं भारतम् ।
येन भूयो भवेद् विश्वभृद् भारतम् ॥

वेदशास्त्रादिभिर्वन्दिता संस्कृतिः।
सा हि प्रत्ना जगद्वन्दिता संस्कृतिः ॥
अग्निवाय्वादिभिः प्राक्तनैः पूजिता ।
सा तु दिव्याऽजरा साऽमरा संस्कृतिः ॥

सा हि सम्यक्कृता संस्कृता संस्कृतिः ।
कं सुखं लाति तस्मै च या चर्यते ॥
कल्चरेत्याह लोकस्तु तां संस्कृतिम् ।
सा प्रसिद्धा सदाचारदा संस्कृतिः ॥

यत्र व्यासादयो भासयुक्ताः सदा ।

कालिदासादयः संस्कृतेः सेवकाः ||
यां च सम्पूज्य रामादयः सम्मताः |
सा सुभाषाश्रिता कान्तिदा संस्कृतिः ||

धर्मप्राणात्मिका यज्ञज्ञानात्मिका |
सौख्यदा मुक्तिदा भुक्तिदा शक्तिदा ||
प्रेमसौख्यादयो येऽपि दिव्याः गुणाः |
तैर्लसन्ती गुणग्राहिका संस्कृतिः ||

तां नुमः संस्कृतिं दुष्कृतेर्हारिणीम् |
प्राणदानेन चैनां तु सेवामहे ||

भारतीया वयं भारतीया च सा |
तावुभौ भारत इन्ध्वहे शाश्वतम् ||

# उत्कृष्टविनोदः

**– सन्दीपकुमारः**
**शोधच्छात्रः**

*“ काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्”*

निबन्धोऽयं चतुर्षु वर्गेषु विभक्तोऽस्ति

१) विनोदः

२) विनोदस्यावश्यकता

३) विनोदप्रकारः

४) विनोदरूपे काव्यशास्त्रे

१)विनोदः - ‘वि’ उपसर्गयुक्तेन प्रेरणार्थकात् नुदतेः निष्पन्नोऽयं शब्दः | चित्तस्य विशेषप्रकारकं नोदनम् आनन्दः एव विनोदः ,अर्थात् विक्लान्ते मनसि यया क्रियया चेतः आनन्दं लभते स आनन्द एव ‘विनोद’ इति कथ्यते, सा क्रिया च विनोदसाधिका |

२) विनोदस्यावश्यकता - मनुष्याः स्वजीविकायै बहुविधानि कार्याणि कुर्वन्ति | यदा ते तैः कार्यैः श्रान्ता: भवन्ति, तदा चित्तस्य विश्रान्त्यै मनोरञ्जिका काचित् क्रिया अपेक्षिता भवति | तया क्रियया चित्तं विश्रान्तं सत् पुनः कार्यकरणाय

सज्जं भवति | नाट्योत्पत्तिप्रसङ्गे आदिकाव्याचार्येण भरतमुनिना नाट्यशास्त्रे अभ्यधायि यत् इन्द्रप्रमुखै: देवैः पितामहब्रह्माणं याच्यमानं नाट्यशास्त्रं ‘क्रीडनीयकमि’ ति ‘ रूपेण अभिहितम् तद्यथा - **‘क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद्भवेत्’ – नाट्यशस्त्रं**

‘क्रीडनीयकम्’ इति शब्दं विवृण्वन् अभिनवभारतीकार: अभिनवगुप्तोऽभिदधाति- ‘क्रीड्यते चित्तं विक्षिप्यते विह्रियते येन तत् क्रीडनीयकम्’ इति | मानवः प्राचीनकालादेव विनोदस्यावश्यकताम् अनुभवति स्म | केचिद् कंचिद् विनोदप्रकारमेव जीविकारूपेण धारयन्ति तेन च धनं यशश्चेति द्वयमेव आप्नुवन्ति यथा – कवयः गायकाश्च | ते कवयः , गायकाः स्वमनांसि रञ्जयन्तः परेषामपि मनस्तोषप्रदाः भवन्ति |

३) **विनोदस्य प्रकाराः –** प्राचीनकालात् अद्य यावत् समयानुसारं परिवर्तमानाः वैयक्तिकरुच्याधारिताः विनोदस्य नैके प्रकाराः जनैराश्रियमाणाः दृश्यन्ते | प्राचीनकाले राजानः कविगोष्ठ्या, शास्त्रचर्चया, नाट्यदर्शनेन, समस्यापूर्त्या, मृगयया, शास्त्रप्रतियोगितया विनोदं कुर्वन्ति स्म कलुषितमनसश्चापरे ते केचिद्

द्यूतक्रीडया, मद्यवेश्यादिव्यभिचारैः तथा कुर्वाणा आसन् | मध्यकाले जनाः पूर्वोक्तैः सर्वैः सह कुक्कुटयुद्धअजयुद्धकपोतोड्डयनादिभिः अनेकैः प्रकारैः मनोरञ्जनं कुर्वन्ति स्म | अद्यतनयुगे कन्दुकेन सह अनेकैः क्रीडाभिः, अश्वादिपशुधावनप्रतियोगिताभिः , अन्तर्जाले फ़ेसबुकादिभिः , दूरदर्शनकार्यक्रमैः , दृश्यक्रीडाभिः, दूषितचेतसश्च जनाः धूमपानादिभिः व्यसनैः जीवनं यापयन्ति | विनोदस्य बहवः प्रकाराः प्रत्येकं काले समुपलभ्यन्ते | एतत्तु व्यक्तावेवाधारितः वर्तते यत् सः केन साधनेन मनोऽनुरञ्जयति उत्कृष्टेन निकृष्टेन वा |

४) **विनोदसाधनं काव्यं शास्त्रञ्च –** विचारकाः कथयन्ति यत् बुद्धिमन्तः मनुष्याः उत्कृष्टरूपेण जीवनयापनं कुर्वन्तः विनोदमपि उत्कृष्टरीत्यैव कुर्वन्ति | उत्कृष्टविनोदसाधनमपि द्विप्रकारकं भवति  तदस्ति काव्यं शास्त्रञ्चेति | काव्यं उत्कृष्टविनोदसाधनमस्ति नास्त्यत्र काऽपि विप्रतिपत्तिः , यतो हि आचार्यमम्मटेन ‘सद्यपरनिर्वृतिः’ काव्यप्रयोजनत्वेन मन्यते , सा च परनिर्वृतिः सकल प्रयोजनमौलिभूता तेनैव चोद्घोषिता  | यतः कव्यास्वादसमनन्तरमेव रसिकः ब्रह्मास्वादसहोदरत्वेन मन्यमानं रसमाप्नोति | तेन परमानन्दापरपर्यायेण रसास्वादेन सः अन्येषां विषयाणां

स्पर्शमात्रमप्यपहाय तस्मिन्नेव काव्ये निमग्नो भवति |एवं काव्यं आनन्दस्य उत्कृष्टतमं साधनमस्ति |

प्राचीनसमये कवयस्तु काव्य एव स्वजीवनं यापयन्ति स्म , किन्तु अन्येऽपि श्लाघ्यचरिताः मनुष्याः काव्यकरणेन श्रवणेन वा मनोरञ्जनं कुर्वन्ति स्म | यथा कादम्बरीकारः स्वनायकं शूद्रकं विवृण्वन् कथयति—" **कदाचिदाबद्धविदग्धमण्डलः काव्यप्रबन्धरचनेन, कदाचिच्छास्त्रालापेन , कदचिदाख्यान-काख्यायिकेतिहासपुराणाकर्णनेन _ _ _ _ _ _ _ _ दिवसमनैषीत् |"** विद्याप्रियभोजराजस्य सभायां कालिदासमुख्याः नवरत्नानि अपि श्रूयन्ते | विविधैः युद्धैः व्यापृतोऽपि सः रिक्तसमये विविधान् काव्यान् शास्त्राणि च रचयामास | सामान्यजना अपि स्वरुच्या काव्यं कुर्वन्ति स्म यथा श्रूयते एकः आख्यानकः – भोजसभायामागतः एकः कौलिकः काव्यविषये पृष्टवति राज्ञि स्वपरिचयं मनोहरपद्यरूपेण ददाति -

**" काव्यं करोमि न हि चारुतरं करोमि यत्नात् करोमि यदि चारुतरं करोमि | भूपालमौलिमणिमण्डितपादपीठ हे साहसाङ्क कवयामि वयामि यामि ||"**

काव्यस्य महिमानमेव ऊरीकुर्वन् महाकविः भर्तृहरिः लिखति –

**" साहित्यसंगीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः"**

सुभाषितपूर्णमनश्चमत्कारकारिणः काव्यस्य माहात्म्यं कश्चित् विपश्चित् एवं प्रकटीकरोति –

**" सुभाषितेन गीतेन युवतीनां च लीलया |**

**मनो न भिद्यते यस्य स योगी वाथवा पशुः ||"**

आलीढब्रह्मास्वादाय योगिने काव्यास्वादस्य नास्त्यावश्यकता तं विहाय यस्य सुभाषितमयेन काव्येन मनः न रज्यते स तु पशुरूप एव |

अन्यत् उत्कृष्टं विनोदसाधनमस्ति शास्त्राभ्यासः | बहवः विद्वांसः एतादृशः सन्ति ये केवलं मनोरञ्जनायैव शास्त्राणां पारायणं कुर्वन्ति | नैके विद्वांसः न केनापि शत्रुत्वेन अपितु विनोदायैव शास्त्रार्थाणामायोजनं कुर्वन्ति | ' काव्यन्तु आनन्दकरं किन्तु बुद्धिं क्लिश्नत् शास्त्रं कथमानन्दजनकम् ' इति पृष्टे | एतस्योत्तरन्तु आचार्यविश्वनाथपद्धतिमनुसृत्य एवं वक्तुं शक्यते –

**' शास्त्रज्ञानामनुभवः प्रमाणं तत्र केवलम् |'** शास्त्रानन्दं तु त एव ज्ञातुं शक्नुवन्ति ये रात्रिन्दिवं शास्त्रे श्रमं कुर्वन्ति | मुहुर्मुहुः कृते प्रयासे यदा काऽपि शास्त्रपङ्क्तिः संगच्छति तमानन्दन्तु शास्त्रे कृतश्रमः एवाऽऽनुभवितुं शक्नोति | शास्त्रानन्दः गणितज्ञेनामुना ज्ञातुं शक्यते यः केनापि सिद्धान्तेन बहु क्लिश्यमानः यदा तमवगच्छति | शास्त्रजन्यमानन्दं

वैज्ञानिकोऽसाववगन्तुं शक्नोति यः अहर्निशं प्रयोगशालायां कालं यापयन् यदा स्वानुसन्धाने साफल्यमाप्नोति | शास्त्रानन्दस्य अस्मात् बलवत्तरं प्रमाणं न भवितुं शक्नोति यत् अस्माकं संस्कृतशास्त्राणां सुदीर्घा परम्परा | यदि शास्त्रैः विनोदः न अभविष्यत्तदा प्रत्येकमपि शास्त्रस्य एतावती दीर्घा परम्परा नाभविष्यत् |

मानवमनः गुणत्रयात्मकं वर्तते | यस्मिन् तत् सत्त्वगुणप्रधानं भवति तेन मनुष्येण उत्कृष्टप्रकारेण जीवनं यापयता विनोदोऽपि उत्कृष्टैरेव प्रकारैः काव्यशास्त्रादिभिः साधनैः प्राप्यते | पुनश्च ये तमःप्रधानाः दुष्प्रवृत्तयः मनुष्याः भवन्ति ते मूर्खाः निकृष्टैः साधनैः विविधव्यसनैः स्वजीवनमधः पातयन्ति | अतः अद्यतने साधनप्रधाने युगे आप्ताधिकरिक्तसमये अस्माभिः काव्यशास्त्रैरेव मनोविनोदः करणीयः | अतः विचारकैरुच्यते ----

**काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् |**
**व्यसनेन च मूर्खाणां निद्रया कलहेन वा ||**

**इति**

# आधुनिका राजमहिष्यः

– सन्दीप कुमारः
शोधच्छात्रः

**(कविता एषा उत्तरप्रदेशे जातायां सत्यघटनायाम् आधारिता वर्तते)**

जिमकार्बेटपार्कं निकषा एकस्मिन् जनपदे

एकदा सिंही एका अमिलत् महिष्या सह

वाग्युद्धं तयोः जातं `का श्रेष्ठा` इतिकृते

वनराजस्य जायाहं , साम्राज्ञी वनवासिनां

बिभ्यति सर्वे पशवो मम उच्चगर्जनात्

अतोऽस्मि श्रेष्ठा इत्युच्चैरगर्जत् सिंही यदा

न बिभ्यती ततः महिषी हसन्तीदमब्रवीत्

मिथ्या मा वद रे दुष्टे कालो गतस्तव तादृक्

शृणु मे महिमानं तावद् प्रस्वेदस्ते भविष्यति

मारिताः अनेके जनाः त्वया खादिताः नैके पशवः

तदापि कोऽपि आरक्षी नाभवत्तव अन्वेषक:

चोरिताहं इति यदा श्रुतं तत्राधिकारिभिः

अन्वेषणे संलग्ना अभूवन् आरक्षिण: साधिकारिण:

मण्डलायुक्तोऽपि अन्वेषको मे तदा जातः

क्राइम ब्रान्चस्याधिकारिणामपि मस्तके स्वेदो दृष्ट:

वद रे मूर्खे कथमिदानीं मत्तस्त्वं गरीयसी

इत्युक्तवत्यां महिष्यां सा सिंहीदमचिन्तयत्

हस्तगता सर्वेऽधिकारा महिषरासभसदृशानां

`त्वमेव गरीयसी भगिनि` कालस्य महिमा महान्

इत्युक्त्वाधोमुखी सिंही तूष्णीं भूत्वा वनं गता //

# गतं क्व देश-भारतम्?

– दयालसिंह पंवार[2]
व्याख्याता
व्याकरण-विभाग,
श्री लालबहादुर शास्त्री राष्ट्रीय संस्कृत विद्यापीठ,
कुतुब सांस्थानिक क्षेत्र, नई दिल्ली ११००१६

न दृश्यते गतं क्व तत् सदैव भासि यद्रतम्,
जगच्च शिष्यतां गतं हि यस्य सम्मुखे नतम्;
अहो! बुभुक्षितेन तेन वीक्ष्यते जगन्मुखम्,
अहो! विचिन्त्यतां पुनर्गतं क्व देश-भारतम्।
स्वजीवनाहुतिं प्रदाय पूर्वजैः स्वतन्त्रता,
कठोर-पौरुषेण कर्म-कौशलेन साधिता;

[2]एषा कविता स्वाध्यायमण्डलेन विभागप्रकल्पेन एषमः अप्रैलमासस्य नवमे दिनाङ्के समायोजितायां काव्यगोष्ठ्यां स्वानुग्रहेण कविना प्रास्तूयत।

परं मनःस्वतन्त्रता न प्राप्यते पुनः कथम्?

अहो! विचिन्त्यतां पुनर्गतं क्व देश-भारतम्।

मृषाप्रलाप एव दृश्यते हि नेतृ-भाषणे,

सदैव चाटुकारिता विराजते वरासने;

प्रशासने प्रवञ्चना करोति नग्ननर्तनम्,

अहो! विचिन्त्यतां पुनर्गतं क्व देश-भारतम्।

क्षता सुपात्रता मनस्विता हता गतास्मिता,

नता विनम्रताधुना विराजिता विलासिता;

समग्रतन्त्रमेव नस्तु वित्तसाधनारतम्,

अहो! विचिन्त्यतां पुनर्गतं क्व देश-भारतम्।

न साम्प्रतं समाचरन्तु पश्चिमाद्धि याचनाम्,

कथं वयं सहामहायमेरिका-प्रताडनाम्;

उदेतु पूर्व-सूर्य एष पूर्वतो हि साम्प्रतम्,

अहो! विचिन्त्यतां पुनर्गतं क्व देश-भारतम्।

नविस्मरन्तु बन्धवः! स्मरन्तु राष्ट्र-गौरवम्,

परं भविष्य-साधनां विना वृथा पुरातनम्;

पुनः श्रमेण प्राप्यतामतीतलुप्तभारतम्

अहो! विचिन्त्यतां पुनर्गतं क्व देश-भारतम्।

# प्रेमसत्रम्

–बलरामशुक्लः
सहायकाचार्यः

नवीनसत्रं पुनरागतं गतस्
तपो गता प्रावृषि कालसूचिका ।
वकाशमाक्षिप्य कृतं हि बालकैर्
नवीनवर्गं गमनाय मानसम्॥

पुरातनप्रेमविदीर्णचेतसां
न नः नवीनं किमपीह विद्यते ।
ततो वियोगः क्षयकालसूर्यवत्
सदायमाचामति चित्तचेतनाम्॥

नभोनभस्याविव चक्षुषोर्द्वयी
निरन्तरं वर्षति प्रावृषं विना ।
गता कदा प्रावृडिहागता कदा
न मेऽवकाशः स्मरणाय किञ्चन ॥

नवीनवर्गान् प्रतिहायनं समे
प्रयान्ति बाला नियतोत्तरोत्तरम् ।
अहं तु रुद्धप्रसरो बताधुना
नुरागवर्गे प्रपठामि मातृकाम् ॥

न नूतनाध्यापनमत्र जायते
न वावकाशस्य कदापि घोषणा ।
वियोगकक्षे तु निषाद्य केवलं
भवत्यहोरात्रमहो परीक्षणम् ॥

नवीनसत्रे नववस्त्रशोभिताः
प्रयान्ति सोत्कं पठनाय बालकाः ।
ममात्र गात्रे तु तथैव सीदति
विशीर्णतन्तु प्रणयस्य कर्पटम् ॥

न विद्यते नूतनसत्रसंगमे

करे परेषामिव पुस्तकं नवम् ।

हृदन्तराले लिखितं पुरातनं

तदेव तन्नाम पठामि सन्ततम्॥

मनोऽवकाशे प्रणयस्य देशिको

वियोगपाठान् नितरां ददाति मे ।

करोमि किं बाष्पमषीमिषादहं

निरन्तरं वक्षसि लेखनाद्विना ॥

# संस्कृतगीतम्

–डॉ॰ वेदप्रकाश डिंडोरिया
सहाचार्यः  संस्कृतविभागे

सर्वासु भाषासु प्रथमा सर्वमनोज्ञा भाषा,

एषाऽस्माकं संस्कृतभाषा॥

चत्वारो वेदाः शास्त्राणि षडस्यां प्रणीताः,

उपासनायज्ञसामादिभिरेषा परमपवित्रा,

उद्गीथा सृष्टेः रहस्यमयी ऋषिप्रणीता भाषा,

एषाऽस्माकं संस्कृतभाषा ॥

रम्या रामायणी कथेति प्रथमा कवेर्वाणी,

यन्नेहास्ति न तत् क्वचित् ऋषीणां सुरवाणी,

सूत्राणि पाणिनेरस्यां मुनिप्रणीता भाषा,

एषाऽस्माकं संस्कृतभाषा॥

कालिदासभारविमाघहर्षादिवसुधाकररूपा,

महाकाव्यरूपकमुक्तकगीतेषु मनोहररूपा,

सुमधुरवचनैरलङ्कृता या कविप्रणीता भाषा,

एषाऽस्माकं संस्कृतभाषा ॥

# गुर्वष्टकम्

– डा० रंजन कुमार त्रिपाठी
सहाचार्यः संस्कृतविभागे

१ .ख्रीष्टाब्देऽष्टरसोनविंशतितमे जौलाइमासान्विते,

पञ्चम्यां शुभलग्नवारसहितायांतारिकायां भुवः ।

भारं हर्तुमभूदहो त्रिजगतां तापं च तप्तात्मनाम्,

ग्रामेयश्छिपरीतिनामविदिते मध्यप्रदेशस्थिते ॥

२ .माता रामसखी च यस्य च कृपारामः पिताशास्त्रभृत्,

जातो ब्रह्मकुले कलङ्करहिते यश्चानवद्ये ततः ।

यश्चाजानुभुजः समस्तविदुषां विश्वासपात्रं सुधीः

सिद्धस्तं रविशंकरं गुरुमहं वन्दे च षाष्टाङ्गकम् ॥

३. वस्वभ्राम्बरकैकमब्जचरणं श्रीचित्रकूटाश्रयम्,

श्रीमन्मारुतिरूपमेव वचसाऽतिक्रान्तकालत्रयम्।

एकस्मिन् समयेऽत्र लोकितमहोन्यत्रापि दृष्टं विभुम्,

नौमीड्यं रविशंकरं शिवकरं सानन्दमानन्ददम् ॥

४ .आस्थाकर्मपरायणो हितरतो वृद्धाश्रमांश्चालयन्,

नैकान्संस्कृतवाक्प्रचारनिरतां विद्यालयान् स्थापयन् ।

योऽसौ रायपुरादिरावतपुरा श्रीकोलकाताश्रयः,

वन्दे तं रविशंकरं गुरुवरं कारुण्यवारां निधिम् ॥

५ .विद्वद्भिः सततं वृतश्चपरितोयुक्तोयशोनिर्मलैः,

कान्त्यानिर्वचनीययातिकमनं बिभ्रद्वपुः शाश्वतम् ।

भालं भास्वरमक्षियुगलं रम्यां दधन्नासिकाम्,

वन्दे तं रविशंकरं गुरुवरं पीताम्बरालङ्कृतम् ॥

६. ग्रीवाकम्बुकलां दधानममलां रुद्राक्षमालां चयः,

आरुण्यादधरस्य बिम्बमधरं वक्षः कपाटायतम् ।

बाहू चार्गलसन्निभौ कटितटं क्षीणं मृगेन्द्रो यथा,

वन्दे तं रविशंकरं गुरुमहं सारस्वतं विश्रुतम् ॥

७. गाम्भीर्येऽम्बुधिसन्निभो हिमवता धैर्ये समः शोभनः,

क्षान्तौक्ष्मासदृशः प्रसन्नवदनस्त्यागे दधीचिः शिविः ।

नादे कर्ण इव प्रसादधनदः कोपेऽनलोदुर्हृदाम्,

वन्दे तं रविशंकरं गुरुवरं भक्त्या नतः सादरम् ॥

८. योऽसौ शास्त्रविशारदः समभवत् वातात्मजाऽनुग्रहात्

वाचा निर्मलया सुधां स्रवति यो मृद्वीकया लीलया ।

शीलौदार्यगुणो नयेन विनयेनासञ्जितः संयतः,

वन्दे तं रविशंकरं गुरुमहं मन्मानसान्तस्थितम् ॥

गुर्वष्टकमिदं पुण्यं यः पठेद् भक्तचेतसा ।

तस्य सर्वार्थसिद्धिः स्यात् पापं नश्यति सत्वरम्॥

# ॥आचार्यपुरुषोत्तमस्तवः॥

–डॉ॰ ओमनाथबिमली
सहाचार्यः संस्कृतविभागे

सत्सङ्गतिं यादृशानां तर्कबुद्धिप्रभाविनीम्।
निश्चप्रचं प्रबोबुध्मः परामृष्टिमिवानुमाम् ॥१॥

तादृशानभिनन्द्याद्य तमोहन्तृगुरून् गुरून् ।
आचार्यानात्मनो धन्यान् कृतकृत्यान् ब्रवामहै॥२॥

यस्य प्रस्रविणी सुधारसझरी वाग्वैखरीझङ्कृतिः
शास्त्रे यस्य गतिर्न बाधितगतिस्सारस्वतीसन्ततिः।
आचार्यत्वपरम्पराप्रतिनिधिर्यस्योत्सवोपस्थितिस्
तस्मै न्यायधुरन्धराय गुणिने भूयो नमस्कुर्महे ॥३॥

पात्रत्वादिविचारभारमसमीक्ष्याङ्गीकृतास्सत्कृताः
कारुण्यश्रितविश्वनाथविदुषा राजीव एवापराः ।
त्वत्पादौ प्रणिपत्य तर्कशिशवो वन्दामहे श्रद्धया
सत्पूज्यावधमर्णभावभरितास्त्वच्छिष्यतामागता॥४॥

आशीर्भिर्वर्धयाचार्यपुनर्दर्शनलाषुकान्।
शास्त्रकण्टकमार्गेऽस्मिन् त्वदङ्गुलि समुत्सुकान् ॥५॥

पद्यपञ्चकमेतद्धि कुसुमीकृत्य वारिधौ ।
विद्याया अनवद्याया कुर्मश्श्रद्धाप्रवाहितम् ॥६॥

# रे यक्ष!

– डॉ० भारतेन्दुपाण्डेयः
सहाचार्यः संस्कृतविभागे

रे यक्ष नायं समयः स्वकीयं
कान्तावियोगं हृदयेन गातुम्।
वक्षो विदीर्णं यदि राष्ट्रमातुः
कान्ताकृते  हृत्तव शिष्यते किम्॥१॥
अश्रूणि पत्न्या भवितुं ददातु
रक्तं प्रसूर्मुञ्चति यत् स्वदृग्भ्याम्।
अदृश्यदृश्यं जननी निभाल्य
शिरांसि कृत्तानि सुतत्रयस्य॥२॥
सिंहा हताः केसरिमार्गतश्चेत्
स उत्सवो नः परमं परन्तु।
पृष्ठे व्रणोऽदीयत तैः शृगालै
रन्यो न कश्चित् किमु सिंहवंशे॥३॥

दैन्यं त्वदीयं खलु युज्यतेऽपि
पत्न्या वियोगे नहि बन्धुघाते।
शौर्यं समालम्ब्य प्रभञ्जनं तं
सीमां हुताशं गमयातिशीघ्रम्॥४॥

शृङ्गाररूपो न रसो वरेण्यः
शरा विमृश्या अयि केवलन्ते।
येषां मुखाग्रेऽरिकृतेऽस्तु वार्ता
सिंहो न सोढुं क्षमतेऽवमानम्॥५॥

रे यक्ष! मेघं दिश शूरभार्या–
पादाब्जरेणुं शिरसा वहेत् सः।
पुनः प्रवर्षेत् सकलेऽपि देशे
सौभाग्यचिह्नं स भुवो जनन्याः॥६॥

# आधुनिकवैद्युतशोधोपकरणानि

– बलरामशुक्लः,
सहायकाचार्यः

अन्तर्जालसहकृतं संगणकम् आधुनिकयुगे विकासस्य प्रतिभूतिरस्ति। एकेन केनचित् कृतस्य श्रमस्य लाभः भूयोभ्य आपादनमन्तर्जालस्य प्रमुखं वैशिष्ट्यम्। अन्तर्जालं न केवलमाधुनिकशोधानामाधारभूमिरस्ति अपितु पारम्परिकशास्त्राणां सर्वविधसंरक्षाणायापि एतज्जीवातुभूतं सिध्यति विशिष्य अस्मिन् वैश्वीकरणस्य युगे यत्र विश्वमपि विश्वं लघुविपणिरूपेण परिणतम्। सामान्यतः संख्याशक्तिमन्तः धनवन्तः क्रियाकौशलवन्तश्च सर्वत्र जयन्ति लघुकांश्च स्वपादतले चूर्णयित्वा अग्रे गच्छन्ति। अन्तर्जालस्य सर्वसौलभ्यमेतम् अन्यायं निरुणद्धि। अनेन तेऽपि विषया आत्मानं रक्षितुं शक्नुवन्ति ये प्रत्यक्षतः विपणिजगता व्यवसायेन अर्थकरितया सम्बद्धा न सन्ति। अन्तर्जालेन विप्रकृष्टाः सन्निकृष्टाः कृताः, विलम्बिताश्च द्रुतीकृताः अर्थव्ययश्च अत्यन्तं लघूकृतः। अनेन अल्पसाधनवन्तोऽपि जनाः तमेव लाभं ग्रहीतुमर्हा यमन्ये तदितराः। संस्कृतस्य कृते तु अन्तर्जालं प्राणाधायकमेव। न केवलं देशस्य अपितु समस्तस्यापि जगतः

संस्कृतसम्बद्धाः सूचनाः एकीकृत्य अन्तर्जालेन संस्कृतस्य महती शक्तिः पुनः सन्धुक्षिता। तत्र विशिष्टकार्याणि वैदेशिकैः विदेशस्थैः भारतीयविद्वद्भिः च कृतः। प्राचि काले प्रकाशमायाताः दुर्लभसंस्कृतग्रन्था येषां पुनःप्रकाशनाय ग्राहकाभावात् प्रकाशकैः नोपक्रम्यते ते छायाप्रति(स्कैन्)रूपेण अन्तर्जाले निधापिताः। ते च निःशुल्कतया तत्तत्स्थानेभ्यः ग्रहीतुं शक्याः। एतेन श्रमस्य धनस्य च महद् रक्षणं सम्भवति। एतर्हि विद्यादुर्भिक्षदुष्काले शोधार्थिनः स्वीयप्रश्नानामुत्तराणि ग्रहीतुमतितरां दुःख्यन्ते। तत्रापि संस्कृतविद्वत्समूहादयः समूहवैद्युतसन्देशाः (Group e-mails) तान् श्रममन्तरेण एव यथामति सहकर्तुं क्षमाः। अधुनावधि सम्पादितानां संस्कृतस्य विविधभाषाभूषिताः कोशाः अपि अत्र विद्यन्ते। येन एकस्य कस्यचित् जिज्ञासितस्य शब्दस्य युगपत् तत्तत्कोशेषु दर्शनं सुकरम्। विश्वस्य अज्ञातेऽपि कस्मिंश्चित् कोणे स्थिताः विविधविद्वांस एतर्हि संस्कृतक्षेत्रे किं किं नवीनं कुर्वते एतद् अनायासं ज्ञातुमर्हन्ति शोधार्थिनः तैः सम्पर्कमपि विधातुं प्रभवन्ति। साम्प्रतं संस्कृतोट्टङ्कणादेः कृते भूयसां प्रविधीनामुपलब्ध्या एतत् कार्यं शिक्षितुं महतः कस्यचन कष्टपूर्णश्रमस्यापि आवश्यकता न विद्यते। परमावश्यकमस्ति युगधर्ममिवैतत् यत् संस्कृतजनाः सामान्येन संस्कृतशोधार्थिनश्च विशिष्य संगणकप्रयोगे श्रद्धावन्तो भूत्वा दत्तावधाना भवेयुः

येन ते एतस्मात् यथोपलब्धसम्भारात् कणेहत्य लाभं लब्ध्वा, एतस्मिन् महति भाण्डारे स्वकीयं योगम् अपि दातुमर्हन्तु।

प्रकृतः प्रयत्नः उपर्युक्त एव विषये संस्कृतजनानां विशिष्य अनुसन्धित्सूनां रुचिसंवर्धनायास्ति। महतः अन्तर्जालजगतः प्रकृष्टोपयोगिनां संकेतानां परिचयपुरस्सरमत्र संग्रहो विहितः अतः दिङ्मात्रता एवास्या प्रस्तुतेः ज्ञातव्या। विश्वास्यते यदेतद् संगृह्य अनुसन्धित्सवः अन्येषु अन्तर्जालस्थानेषु अत्रानुक्तेषु प्रवर्तिष्यन्त इति।

**१–संसाधनानि–**

**sanskritdocuments.org**

अन्तर्जाले संस्कृतसम्बद्धसूचनानां महत्तमः संग्रहः। अत्र संस्कृतशिक्षणस्य शोधस्य चोपयोगीनि भूयांसि उपकरणानितेषां संकेताश्च विद्यन्ते, यथा– संस्कृतकोशाः, ग्रन्थाः, वैयक्तिककक्षाः इत्यादयः। अत्र धृतानि वस्तूनि देवनागर्याम् अथ च रोमन–लिप्याम् अपि वर्तन्ते। संस्कृतशिक्षणाय विभिन्न यन्त्राणि(Software)तन्त्रज्ञैर्विकासितानि अत्र सङ्केतितानि।

http//:sanskrit.jnu.ac.in

जवाहरलालनेहरूविश्वविद्यालयस्य संस्कृतप्रगताध्ययनकेन्द्रगतैश्छात्रैरध्यापकैश्च सहभूय निर्मितमिदं जालस्थानमनेकानि शोधोपकरणानि दधाति। अमरकोश–वाक्यपदीयादिग्रन्था अत्र यूनिकोड–मध्ये सज्जीकृत्य स्थापिताः। सुप्तिङन्तादिविश्लेषकानां यन्त्राणां विकासः अस्य वैशिष्ट्येषु अन्यतमः।

http://sanskritdocuments.org/learning_tools/sarvanisutrani/allsutrani.htm

अत्रसर्वेषामेवपाणिनिसूत्राणांकाशिकान्यासपदमञ्जरी–कौमुद्यादिसहकृतानामेकत्रअजितकृष्णेन तत्तत्स्थानेभ्यः आहृत्य आहृत्य संग्रहः कृतः। व्याकरणाध्ययने धृतोत्साहानां शोधार्थिनां कृते समस्तस्यापि सव्याख्यस्य शास्त्रस्य आहृत्य प्रकाशनेन महदुपयोगि स्थानमेतत्।

http://www.taralabalu.org/panini/greetings.htm

शिवमूर्तिस्वामिना सिरिगेरेमठ (कर्नाटक–) स्थेन विकासिता गणकाष्टाध्यायी अष्टाध्याय्याः व्याख्यायामुपयोगि।

एतद्देवनागरी–रोमन्–लिप्योः द्रष्टुं शक्यते। अत्र सूत्राणां पदपाठ–वृत्ति–व्याख्याश्च नियोजिताः वर्तन्ते। कौमुदीवृत्तिरपि अत्र दत्तास्ति।

http://sanskrit.sai.uni-heidelberg.de/Chanda/

छन्दांसि परिचेतुम् प्रवर्तितमिदं जालस्थानम्। एतत् छन्दांसि प्रत्यभिज्ञातुम् अपि अर्हति। पाणिनीयव्याकरणविषया अपि अत्र सन्निवेशिताः।

https://sites.google.com/site/samskritavyakaranam/

आधुनिकजगति पाणिनीयव्याकरणस्य वैज्ञानिकव्याख्यात्र्याः पुष्पादीक्षितमहाभागायाः केनचिद् अमेरिकीयशिष्येण तदीयपद्धतिं ज्ञापयितुं सामग्री अत्र समग्रीकृता।

**२–ग्रन्थाः**

Archives.org

अत्रनैकैःअटलाण्टादिवैदेशिकविश्वविद्यालयैःसंस्थाभिश्च छायाप्रतिरूपेणउपायनीकृतानिभूयांसिविविधभाषापुस्तकानि अत्र प्रचुरतया पी डी एफ़ रूपेण विराजन्ते निश्शुल्कं च गृहीतुं शक्यानि। तत्र संस्कृतस्य न केवलं ग्रन्था अपितु अन्यानि अपि दृश्यश्रव्योपकरणानि विद्यन्ते।संस्कृत–पी॰डी॰एफ़॰ग्रन्थानांमहत्तमःसंग्रहएषःकथयितुंशक्यम्।

## www.sanskritworld.in

अत्रसंस्कृतग्रन्थाःयूनिकोडमध्येटङ्कयित्वानिधापितानि येनतेषाम् अन्यत्र अन्यथा चोपयोगोऽपिभवितुंशक्नोति। वस्तुतः वैदेशिकैः संस्कृतग्रन्थाः भूरिशः उट्टङ्क्य अन्तर्जाले निधापिताः परन्तु तत्र नः कृते समस्यास्ति यत् तेषां लिपिः रोमन् अस्ति। कैश्चनाध्यवसायिभिः तद्विद्भिः त एव ग्रन्था नागरीलिप्यांपरिणमय्य प्रस्तूयन्ते येन संस्कृतविद्भ्यः तेषां महत्त्वम् अनेकगुणितं जायते । एतादृशानि एव कार्याणि अत्र धृतानि सन्ति। डा॰धवलपटेलेनसम्पादितंकार्यमिदम्। अत्र वैदिकसाहित्यवर्गे ४६, महाकाव्यवर्गे १०, पुराणवर्गे २१, धार्मिकसाहित्यवर्गे २२९, काव्यवर्गे ८२, अलङ्कारवर्गे २९ अपरे च अनेके ग्रन्थाः एकत्रीकृताः।

www.dli.ernet.in

डिजिटललाइब्रेरीआफ़इण्डिया कार्यमेतत् विविधभारतीयप्रौद्योगिकसंस्थानैः उपक्रान्तम्॥ अत्रभूयांसःशोधोपयोगिग्रन्थाःआनीयच्छायाप्रतिरूपेण स्थापिताः। एतत् सर्वं डाउन्लोड् कर्तुं पूर्वं साफ़्टवेयर–विशेषस्य साहाय्यं ग्राह्यं भवति।

http://www.muktabodha.org

कार्यमेतत् अनेकसंस्थाभिः सम्भूय क्रियते। अत्र धार्मिकदार्शनिकग्रन्थाः यथा काश्मीरशैव–तन्त्रग्रन्थाः–वैदिकग्रन्था प्रामुख्येन स्थितिमन्तः।

## The GRETIL e-library

भारतविद्यासम्बन्धी पुस्तकालय एषः वैदेशिकसंस्थया कयाचन संगृहीता। अत्र मुख्यतः प्राचीनग्रन्थाः साहित्येतिहाससहकृता विद्यन्ते।

http://sarit.indology.info

ग्रन्थानामुपलब्धयेऽत्र महत्त्वाधायि–अन्वेषण–सङ्केतानां संग्रहो विहितोऽस्ति।

http://sanskritlibrary.org/

अत्र भूयसां संगणकीकृतानां संस्कृतग्रन्थानां  संग्रहः वरिवर्ति ।

Sanskritbooks.org

केरलनिवासिनः शङ्कराख्यस्यसंस्कृतप्रेमिणइदंजालस्थानम्।अत्रबहुभ्यःस्रोतोभ्यउपयोगिपुस्तकानांसंकेतान् आदाय एकत्र अध्यवसायिनानेन प्रदत्तमस्ति। एतस्य अन्यद् अन्तर्जालस्थानमस्ति - hindubooks.org.

http://books.google.com

संस्कृतस्यापि बहवः सन्ति। सामान्यतया एतेषा संग्रहणं निश्शुल्कं न विद्यते गूगलसमूहेन भूयांसि पुस्तकानि संगणकीकृतानि तेषु ।

ignca.nic.in/asp/searchResults.asp?page=2&searchOption=sc&searchTerm=sanskrit

सर्वकारीय एष प्रयासः । परश्शताः ग्रन्थाः पी डी एफ़ रूपेण समाकलिता अत्र निश्शुकं ग्रहीतुं शक्याः। एतद्भूतानि नैकानि पुस्तकानि अन्यत्रापि समुपलभ्यन्ते। राष्ट्रियाभिलेखागारगतानि पुस्तकानि अत्र च्छायारूपेण संस्थितानि।

## ignca.nic.in

गौडीयग्रन्थमन्दिरस्यसहकारेणगौडीयाःइतरेचअसाम्प्रदायिकाअपिग्रन्थाअत्रनिधापितावर्तन्ते।

## sanskrit.nic.in

राष्ट्रियसंस्कृतसंस्थानेनापिप्राचामर्वाचांसंस्कृतग्रन्थानां भाण्डारःसम्पादितः। आधुनिकसंस्कृतसाहित्यपुस्तकालयस्य निर्माणप्रयासः विगतवर्षेषु संस्थानेन कृतः सोऽत्यन्तमभिनन्दनीयः। अत्र प्रमुखानाम् राजेन्द्रमिश्र-राधावल्लभत्रिपाठिप्रभृतीनाम् आधुनिकसंस्कृतकवीनां गद्यपद्यसंदृब्धाः ग्रन्थाः विभिन्नपरिसराणां सहकारेण संगणकीकृत्य संरक्षिताः। एष प्रयासः अद्वितीय इवास्ति अस्मिन् क्षेत्रे।

www.jainelibrary.org

दर्शने विशिष्य जैनदर्शनेसन्धानोत्सुकानामुपयोगिस्थानम्। एतस्य सन्देशतन्त्रम् (group e-mail) विद्यते येन नवीनतया स्थाप्यमानानां पुस्तकानां सूचना प्राप्यते।

http://www.uwest.edu/sanskritcanon

http://www.dsbcproject.org

अत्रबौद्धदर्शनविषयाःप्रायशः६८०सूत्र–शास्त्र–स्तोत्रग्रन्थाःसमुपलम्भिताःसन्ति।अत्र कार्ये बहवः बौद्धसंस्थाः सहकर्तुं बद्धपरिकराः सन्ति।

dvaita.net

अत्र द्वैतवेदान्तसम्बन्धिनः दार्शनिकग्रन्थाः विद्यन्ते।

http://www.sankara.iitk.ac.in/,http://www.gitasupersite.iitk.ac.in/http://www.brahmasutra.iitk.ac.in/

कानपुरस्यभारतीयप्रौद्योगिकसंस्थानेनएतानिजालस्थानानिविहितानि। अत्र प्रथमे शङ्कराचार्यस्य सर्वेऽपि ग्रन्थाः, द्वितीये भगवद्गीतायाः सर्वा अपि प्रमुखव्याख्याः, ब्रह्मसूत्रस्यापि सर्वाः साम्प्रदायिक्यो व्याख्या महता प्रयत्नेन एकीकृताः सन्ति। अनेकेषाम् एषां पुस्तकानां युगपदुद्घाटनेन पारस्परिकी व्याख्यापि शक्या। भारतस्य सर्वास्वपि लिपिषु सर्वापि अत्रत्या अविकला सामग्री द्रष्टुं शक्यते इति तु महान् विशेषः।

http://homepage.mac.com/somadevah/Etexts.html

सोमदेवेनविदुषासम्पादितमेतद् स्थानम्अनेकग्रन्थानां यूनिकोड्–मध्ये स्थापनपुरस्सरम्॥

http://www.yogaclassics.org/

न्यूयार्क–हाँगकाँगस्थेन केनचित् समूहेन योगसम्बन्धीनि पुस्तकानि संरक्षितुं एषः महान् प्रकल्प उपक्रम्यते। अत्र श्रीमद्भागवतादिग्रन्था अपि योगस्य गौणग्रन्था अपि दृश्यन्ते।

http://www.valmikiramayan.net

अत्र जालस्थाने रामायणं अनुवादसहकृतं प्रस्तूयते। अत्र विभिन्नपाठभेदा अपि चर्चिताः। श्रीदेसिराजहनुमन्तराव–के॰एम॰के॰राव् एताभ्यां विद्वद्भ्यामयम् अनुवादकार्यं सम्पाद्यते। सम्पूर्णस्यापि श्रीरामायणस्य ध्वनिमुद्रणमपि एनेन आरब्धम् इति प्रमोदास्पदम्।

https://sa.wikibooks.org/wiki

संस्कृतमाध्यमेनापि विकीबुक्स इति प्रसिद्धजालस्थानके पुस्तकानि यूनिकोड–मध्ये स्थापितानि तत्र यथोपयोगं ग्रहीतुं शक्यानि।

http://indology.info/etexts/

अन्येषाम् आङ्ग्ललिपौलिखितानांपुस्तकानांसूची अतः स्थानाल्लब्धुं प्रभूयते।

## २–समूह–ई–मेल

संस्कृतविद्वद्भिः सह प्रत्यक्षतः सम्पर्कं विधातुम् अथ चतान्प्रश्नान् प्रष्टुम् एतेऽवकाशाः कल्पिताः।

भारतीयविद्वत्परिषद्, bvp

https://groups.google.com/group/bvparishat/subscribe

संस्कृतेऽनुसन्धित्सूनां भारतीयानां कृते निर्मितमेतत् जालस्थानं संकरतपरम्पराम् अवगन्तुं, रक्षितुं समर्धयितुं च कृतसंकल्पम्। अत्र स्वीयप्रश्नान् अधिकृत्य जिज्ञासवः अनुयुञ्जन्ति तद्विद्वांसश्च उत्तरयन्ति। अत्यन्तं प्रचलितमेतद्समूह–ई–मेल–सङ्केतः। वीरनारायणपाण्डुरङ्गि–अजितगर्गेश्वरी श्रीनिवासवरखेडि–उदयनहेगे–हरिनारायणभट्टादयः विद्वांसः अत्यन्तं समयोपयोगपुरस्सरमेतच्चालयन्ति। अत्र नवीनसदस्याःप्रक्रान्तानां प्राचांसंवादानामुपलब्धिमपि कर्तुमर्हन्ति। (Archived messages) अन्ये–

http://groups.google.com/group/samskrita

http://mailman.cs.utah.edu/listinfo/sanskrit

http://mailman.cs.utah.edu/listinfo/sanskrit

indology@list.indology.info

## ३–शोधपत्रिकाः

अत्र शोधार्थिनः नवीनशोधप्रवृत्तीः द्रष्टुमर्हाः स्वकीयशोधलेखान् प्रकाशयितुं च।

**ejvs.laurasianaacademy.com**

(Electronic journal of Vedic Studies. Published by the American Theological Library Association.)

**CIF-chinfo.org**

चिन्मयफ़ाउण्डेशन्–तः निःसरन्ती एषा पत्रिकाऽस्ति धीमहिनामधेया

**http://sarasvatniketanam.org/JSEJ**

जाह्नवी ई–शोधपत्रिका विपिनझावर्येण सञ्चाल्यते।

**https://sites.google.com/site/praachiprajnaa/**

प्राचीप्रज्ञायाः सम्पादकः सुज्ञानकुमारमाहान्तिः। पत्रिकैषा न तु शोधपत्रिका।

sanskritejournaldu@gmail.com

( Journal of Sanskrit Department, University of Delhi)

प्राक्काले प्रकाशितचरी शोधपत्रिकैषा पुनः दिल्लीविश्वविद्यालयसंस्कृतविभागे ई–शोधपत्रिकारूपेण सद्यः प्रारभ्यमाणास्ति।

**४–कोशाः**

http://www.sanskrit-lexicon.uni-koeln.de/scans/SKDScan

http://www.sanskrit-lexicon.uni-koeln.de/monier/

http://www.sanskrit-lexicon.uni-koeln.de/scans/VCPScan

http://www.sanskrit-lexicon.uni-koeln.de/scans/ACCScan/

एते अन्तर्जालीयकोशाः शब्दकल्पद्रुम–वाचस्पत्य–आप्टे–मोनियर्–आदयः जर्मनीदेशस्य कोलोनविश्वविद्यास्थैः विद्वद्भिस्तन्त्रज्ञैर्विकासिताः।

http://www.aupasana.com/stardict

अजितकृष्णेन अनेकेषाम् आङ्ग्लकोशानामेकत्र संग्रहः कृतः। अत्र च सकृन्नोदनेन तत्तत्कोशकाराणां मतानि युगपत्प्रादुर्भवन्ति। रोचकम् उपयोगि चेदं कार्यम्।

etymonline.com

संस्कृतशब्दानां व्युत्पत्तिपरकान्वेषणार्थमेतत् स्थानं नितरामुपयोगि।

## ५–विकीपीडिया

http://sa.wikipedia.org/wiki

२००३तमवर्षस्यदिसम्बरमासेअस्याःआरम्भःजातः।सम्प्रतिसंस्कृतविकिपीडियायां १०,१९८ लेखाःसन्ति। संस्कृतभारतीजनैरन्यैश्च विद्वद्भिः कार्येऽस्मिन् महान् सहकारः कृतः।।

**६–ब्लॉग**

आत्मनीनं यत्किञ्चित् हार्दं भवतु सर्वमपि तन्निवेदयितुं प्रकाशयितुं शिक्षयितुं च अत्यन्तमुपयोगी विकल्पोऽधुना अन्तर्जालजगति गतिमान् दृश्यते–ब्लाग इति। संस्कृतज्ञा अपि एतस्य भूयसा उपयोगं विदधति। अतितरां गभीरा विषयाश्चानेन माध्यमेन चर्च्यन्ते। कतिचित् प्रमुख–ब्लाग्–सङ्केता अत्र प्रदीयन्तेऽवलोकनाय–

Sanskritlinks.blogspot.com

Samskritam.wordpress.com

Learnsanskritam.wordpress.com

Sanskritbooks.wordpress.com

अन्ये–

- http://sanskritam.ning.com/, Sanskrit family, audio, video and संस्कृत-गीतानि, नाटकानि, साहित्यं, चर्चाः, लेखनं, पठनं, - सोत्साहंसंस्कृत-संवर्धनायकार्यरता:(Bipin)
- http://samskritwisdom.wordpress.com/ San skrit Wisdom, सरसश्लोकाः, कथाः, वार्ताः, विनोदकणिकाश्च (Shankara)
- http://kalidasa.blogspot.com/ जयतुजयतुसंस्कृतम्Samskritam blog by a student. अद्यतनविषयान्अधिकृत्यसंस्कृतेनइतिवृत्त-लेखनम्। (Ajit)
- http://learnsanskrit.wordpress.com/ संस्कृतंशिक्षामहे।Learn Sanskrit, Let us learn Sanskrit! (Himanshu)
- http://practicalsanskrit.blogspot.com/, Practical Sanskrit, Sharing the joy of practical and modern relevance of Sanskrit, Come curious - Go wise (Shashikant)

- http://venetiaansell.wordpress.com/, Bringing Sanskrit literature to a wider global audience (Venetia)
- http://koham.wordpress.com/, संस्कृतायकिञ्चिद्– अन्वेषणम्अपि (Avinash)
- yaajushi.wordpress.com/, जालिकानांजालशिष्टाचारः, Words, words, where art thou?? (Yajushi)
- http://slabhyankar.wordpress.com, संस्कृताध्ययनम्।Learning Sanskrit by fresh approach (Shripadji)
- http://yaajushi.blogspot.com/, याजुषी–गीतसंस्कृतम् (Yajushi)
- http://sudharma.epapertoday.com, सुधर्मासंस्कृतवार्तापत्रम्Daily Sanskrit newspaper (Sampath Kumar)
- http://satyayugam.blogspot.com/, ॥सर्वसज्जनहितम्॥कस्यचित्सामान्यजनस्यसत्यान्वेषणे लब्धानुभवाः।

- http://nimittam.blogspot.com/, निमित्तमात्रम्चनिमिषमात्रम्by drisyadrisya (Arun )
- http://triveni-pittsburgh.blogspot.com/ Triveni - The Sanskrit group of Pittsburgh
- http://vykharee.blogspot.com/ वैखरीby ज्योतिर्मयी (Jyotirmayi)
- http://samskrute.blogspot.com/, संस्कृतेलिखामःयद्यत्संस्कृतसाहित्यविषयेजानामितत्लेखितुम्इदमेकंमाध्यमम्
- http://samskrtam.wordpress.com/(Karthik)
- http://paniniyam.wordpress.com/, panini's blog जयतुजगतिपाणिनीय-तन्त्रम्…
- http://vagartham.blogspot.com/, vAgartha: - वाच: अर्थ: | Meaning of the Word. (Vasu)
- http://sanskritforall.wordpress.com/, संस्कृतनामदैवीवाक्– Sanskrit for all-

- http://sanskrut.wordpress.com/देववाणीसंस्कृत (HimanshubhaiMistry)
- http://srinilakshmi.wordpress.com/, व्याकरणम्– Grammar
- http://kaadambari.wordpress.com चन्द्रापीडचरितम्

**७–शोधप्रबन्धाः**

शोधात् पूर्वं करिष्यमाणविषयमधिकृत्य सर्वेक्षणम् अनिवार्यं भवति तदर्थम् एतानि जालस्थानानि प्रभवन्ति।

**www.mgutheses.in**

महात्मागान्धिविश्वविद्यालयेनोपक्रान्त एष सहस्राधिकभारतीयशोधप्रबन्धानां संग्रहः। संस्कृतस्यापि शोधा अत्र धृताः सन्ति।

**sanskritworld.in**,http://shodhganga.inflibnet.ac.in/

एत अप्युपयोगिनी स्थाने।

**८–एग्रेगेटर (एकीकारकः)**

http://sanskritcentral.com/

एतत् पृष्ठं संस्कृतसम्बन्धिजालस्थानानाम् एकीकरणपुरस्सरं तेषु तेषु स्थानेषु प्रवर्तमाननवीनसूचनानाम् प्रदानम् अपि कुरुते। कश्चिद् अन्योऽपि स्वीयं संकेतं sanskrit@cheerful.com अत्र संप्रेष्य योजयितुं शक्नोति।

## ९– संस्कृत ई–पाठशाला

http://ggss-lessons.org

बङ्गलूरुस्था श्रीमतीसौम्या कृष्णपुर् सिद्धान्तकौमुदीं पाठयति। एषा प्रख्यातवैयाकरणानां महाबलेश्वरभट्टानां शिष्या। कक्षानां सूचना अस्मिन् सङ्केते प्राप्तुं शक्यते। व्यतीतपाठानाम् अध्यापनानि अपि ध्वनिमुद्रणरूपेण प्राप्तुं शक्यन्ते।

www.vyomalabs.in

अत्र मुख्यतः सी॰बी॰एस्॰सी॰ पाठ्यक्रमस्थसंस्कृतपाठानां पाठनं प्रवर्तते।

## १०– अन्यानि दृश्यश्रव्योपकरणानि

http://vedabhoomi.org/

आन्ध्रप्रदेशस्य जगदेवपुरग्रामे संस्थितस्य सीतारामवेदसंस्कृतविद्यापीठस्य जालस्थानेऽस्मिन् रघु–कुमार–मेघ–किरातादिकाव्यानि समल्लिनाथव्याख्यानि, शाङ्करभाष्यसहकृताः चोपनिषदः, सिद्धान्तकौमुद्याः षड्लिङ्गप्रकरणान्तं च व्याख्यानं, एतेषां ध्वनिमुद्रणं सम्यक् प्रस्तुतम् ॥

एतदतिरिच्यYoutube, Archives.org, mediafireआदिषु स्थानेषु संस्कृतविदुषां तत्तच्छास्त्रोपयोगिनानां वार्तानां दृश्यश्रव्यरूपेण समाहारो विद्यते। तत्र प्रमुखाः सन्ति जि॰ महाबलेश्वरभट्टः, अशोकअक्लूजकरः, शतावधानीगणेश, रामानुजदेवनाथादयो विद्वांसः। अत्र विद्वद्भिः स्वकीयान्यपि वस्तूनि अन्येभ्यो ज्ञापयितुमिष्टानि निधातुं शक्यानि।

एतावतीषु शोधसामग्रीषु सतीषु वयं वञ्चिता न भवेम इत्येतदर्थं अस्माभिः वैयक्तिकरूपेण संस्थाभावेन वा भूयान् एतासामुपयोगो विधेयः, प्रतिस्पन्दैः अत्राभियुक्ता ये ते प्रोत्साहनीयाः अथ च यथाशक्ति स्वयमपि अत्र योगो दातव्यः येन संस्कृतसमाजः अस्मिन् प्राविधिकयुगे सबलतरः सञ्जायताम्।